# द्रुतवाचनम्

## (प्रहेलिका)

[जीवन की आरम्भिक अवस्था में बौद्धिक विकास, तर्कशक्ति की प्रखरता, कल्पनाशक्ति के संवर्धन तथा मनोरञ्जन की दृष्टि से संसार की प्रमुख भाषाओं में प्रहेलिकाओं का विकास हुआ है । इन्हें "पहेली" तथा Riddles कहा जाता है । इन्हें सुनकर शिक्षार्थी अपनी कल्पना तथा तर्क के द्वारा उत्तर खोजने का प्रयास करता है जिससे उसकी बौद्धिक क्षमता बढ़ती है । संस्कृत भाषा में भी प्राचीन काल से ही प्रहेलिकाएँ रही हैं । यहाँ प्राचीन और आधुनिक दोनों प्रकार की प्रहेलिकाओं का संकलन प्रस्तुत किया गया है । शिक्षार्थी पहले अपनी कल्पना से इन्हें हल करने का प्रयास करें तब दिये गये उत्तरों से समाधान प्राप्त करें ।]

नित्यं भ्रमति योगी न महदुष्णो न पावकः ।
विकासयति यः पद्मं वृत्ताकारो वदन्तु कः ? ॥1॥

वर्धते यः कदाचित्तथा क्षीयते
दृश्यते वा कदाचिन्न तद् दृश्यते ।
वारिधिर्नास्ति नैवाऽस्ति वायुस्तथा,
कोऽस्ति सः तस्य किन्नामधेयं सखे ? ॥2॥


विश्वप्रसिद्धा भुवि राजमाना,
प्रकाशमाना न रविर्न वह्निः ।
न रूपमेवाऽस्ति तथापि लोके,
सर्वत्र सर्वैरवलोक्यते का ? ॥3॥



भ्रमामि नित्यं न शशी न भानुः
चक्राणि मे सन्ति न तेषु वायुः ।
वहामि लोकान् न च वायुयानं,
वदन्तु मे किं खलु नामधेयम् ? ॥4॥

गगने डयते न खगो न सुरो,
न शशिर्न रविर्हनुमानपि नो ।
जनवाहनमस्ति भुवि प्रथितं,
नरनिर्मितमस्ति सखे ! वद किम् ॥5॥

अस्थि नास्ति शिरो नास्ति,
बाहुरस्ति निरंगुलिः ।
नास्ति पादद्वयं गाढम्,
अंगमालिंगति स्वयम् ॥6॥

**उत्तराणि** - 1. सूर्यः, 2. चन्द्रमाः, 3. विद्युत्, 4. रेलयानम्, 5. आकाशवाणी (रेडियो), 6. कञ्चुकः (कुर्ता


**शब्दार्थाः**

| | | |
|---|---|---|
| नित्यम् | – | प्रत्येक दिन |
| भ्रमति | – | घूमता है |
| योगी | – | साधक |
| न/नो | – | नहीं |
| महदुष्णः | – | अत्यधिक गर्म |
| पावकः | – | आग |
| विकासयति | – | विकसित करता है |
| यः | – | जो |
| पद्मम् | – | कमल |
| वृत्ताकारः | – | गोल आकार का |
| वदन्तु | – | कहें, बोलें, बताएँ |
| वर्धते | – | बढ़ता है |
| कदाचित् | – | कभी |
| क्षीयते | – | घटता है |
| दृश्यते | – | दिखाई देता है |
| वारिधिः | – | समुद्र |
| किन्नामधेयम् | – | किस नाम का |

| | | |
|---|---|---|
| सखे | – | मित्र (सम्बोधन) |
| भुवि | – | धरती में, पृथ्वी में |
| राजमाना | – | सुशोभित है, विराजमान है |
| प्रकाशमाना | – | प्रकाशित होती हुई |
| रविः | – | सूर्य |
| वह्निः | – | आग |
| रूपम् | – | आकार, स्वरूप |
| लोके | – | संसार में |
| सर्वत्र | – | सभी जगह |
| सर्वैः | – | सभी लोगों के द्वारा |
| अवलोक्यते | – | देखी जाती है |
| शशी | – | चन्द्रमा |
| भानुः | – | सूर्य |
| चक्राणि | – | पहिये (बहुवचन) |
| वायुयानम् | – | हवाई जहाज |
| खलु | – | निश्चय ही |
| गगने | – | आकाश में |
| डयते | – | उड़ता है |

| | | |
|---|---|---|
| खगः | – | पक्षी |
| सुरः | – | देवता |
| जनवाहनम् | – | लोगों का वाहन |
| प्रथितम् | – | प्रसिद्ध |
| अस्थि | – | हड्डी |
| नरनिर्मितम् | – | मनुष्य द्वारा बनाया हुआ |
| शिरः | – | सिर |
| निरंगुलिः | – | बिना अंगुली वाला |
| पादद्वयम् | – | दो पैर |
| गाढम् | – | बहुत अधिक |
| अंगम् | – | शरीर में |
| आलिंगति | – | लिपटता है |

## सन्धि विच्छेदः –

| | | |
|---|---|---|
| महदुष्णः | = | महत् + उष्णः |
| कदाचिन्न | = | कदाचित् + न । |
| वारिधिर्नास्ति | = | वारिधिः + नास्ति । |
| वायुस्तथा | = | वायुः + तथा । |
| कोऽस्ति | = | कः + अस्ति । |

| | | |
|---|---|---|
| किन्नामधेयम् | = | किम् + नामधेयम् । |
| रविर्न | = | रविः + न |
| रूपमेवाऽस्ति | = | रूपम् + एव + अस्ति |
| रविर्हनुमानपि | = | रविः + हनुमान् + अपि |
| नास्ति | = | न + अस्ति |
| बाहुरस्ति | = | बाहुः + अस्ति |
| निरंगुलिः | = | निः + अंगुलिः |

**प्रकृति–प्रत्यय विभागः**

| | | |
|---|---|---|
| भ्रमामि | – | √भ्रम् , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| वदन्तु | – | √वद् , लोट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| अस्ति | – | √अस् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| वहामि | – | √वह् , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| दृश्यते | – | √दृश् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| सन्ति | – | √अस् , लट्लकारः, प्रथमपुरुषः, बहुवचनम् |

## अभ्यासः

### (मौखिकः)

1. **प्रहेलिकाः सस्वरं गायत ।**
2. **अधोलिखितानां पदानां धातुं वदत ।**

(क) अस्ति, सन्ति, वदति, भ्रमामि, वदन्तु, वहामि, ।

3. **अधोलिखितानां पदानाम् अर्थं वदत–**

खगः, पावकः, अस्थि, पादद्वयम्, कदाचित्, वर्धते, सर्वत्र, विकासयति, प्रकाशमाना, सुरः, गगनम् ।

## (लिखितः)

1. **एकपदेन उत्तरं दत्त –**

(क) सूर्यः नित्यं किं करोति ?

(ख) कः क्षीयते वर्धते च ?

(ग) खगः कुत्र डयते ?

(घ) गगने शशिवत् नित्यं कः भ्रमति ?

(ङ) भुवि प्रचितं किम् ?

(च) कीदृशः कञ्चुकस्य बाहुः अस्ति ?

(छ) अंगम् कः आलिंगति ?

2. **उचितं मेलनं कुरुत–**

| | |
|---|---|
| (क) विश्वप्रसिद्धा भुवि | (i) खगो न सुरः |
| (ख) भ्रमामि नित्यं न | (ii) तथापि लोके |
| (ग) न रूपमेवाऽस्ति | (iii) शिरो नास्ति |
| (घ) गगने डयते न | (iv) राजमाना |
| (ङ) अस्थि नास्ति | (v) शशी न भानुः |

3. **अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत –**

वायुस्तथा, रविर्न, नास्ति, नैवाऽस्ति, किन्नामधेयम्, कोऽस्ति, महदुष्ण:

4. **पर्यायवाचिन: शब्दान् लिखत–**

यथा – भानु: = रवि:

| | | |
|---|---|---|
| (क) पावक: | – | – |
| (ख) शशी: | – | – |
| (ग) वायु: | – | – |
| (घ) गगनम् | – | – |
| (ङ) खग: | – | – |
| (च) सुर: | – | – |
| (छ) भुवि | – | – |

5. **अधोलिखितपदेषु लकारं पुरुषं वचनं च लिखत –**

| | लकार: | पुरुष: | वचनम् |
|---|---|---|---|
| यथा–पठन्तु | लोट्लकार: | प्रथमपुरुष: | बहुवचनम् |
| (क) भ्रमति | – | – | – |
| (ख) अस्ति | – | – | – |
| (ग) वदन्तु | – | – | – |
| (घ) सन्ति | – | – | – |
| (ङ) भ्रमाणि | – | – | – |
| (च) वहामि | – | – | – |
| (छ) दृश्यते | – | – | – |

◆◆◆